শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

## শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে

# ॥ পঞ্চাশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ পঞ্চাশঃ সর্গঃ ॥

## রাৰণকর্তৃকঃ প্রহস্তদ্বারকো হনুমন্তং প্রতি লঙ্কাযামাগমনপ্রযোজনস্য প্রশ্নঃ, হনুমতা রামদূতৎৱেনাত্মনঃ পরিচযদানম্

তমুদ্বীক্ষ্য মহাবাহুঃ পিঙ্গাক্ষং পুরতঃ স্থিতম্।
রোষেণ মহতাঽঽৱিষ্টো রাৱণো লোকরাৱণঃ ॥ **5.50.1** ॥

শঙ্কাহতাত্মা দধ্যৌ স কপীন্দ্রং তেজসা ৱৃতম্।
কিমেষ ভগৱান্ নন্দী ভৱেৎ সাক্ষাদিহাগতঃ ॥ **5.50.2** ॥

যেন শপ্তোঽস্মি কৈলাসে মযা প্রহসিতে পুরা।
সোঽযং ৱানরমূর্তিঃ স্যাৎকিংস্বিদ্ বাণোঽপি ৱাসুরঃ ॥ **5.50.3** ॥

স রাজা রোষতাম্রাক্ষঃ প্রহস্তং মন্ত্রিসত্তমম্।
কালযুক্তমুৱাচেদং ৱচো ৱিপুলমর্থৱৎ ॥ **5.50.4** ॥

দুরাত্মা পৃচ্ছ্যতামেষ কুতঃ কিং ৱাস্য কারণম্।
ৱনভঙ্গে চ কোঽস্যার্থো রাক্ষসানাং চ তর্জনে ॥ **5.50.5** ॥

মৎপুরীমপ্রধৃষ্যাং ৱৈ গমনে কিং প্রযোজনম্।
আযোধনে ৱা কিং কার্যং পৃচ্ছ্যতামেষ দুর্মতিঃ ॥ **5.50.6** ॥

রাৱণস্য ৱচঃ শ্রুৎৱা প্রহস্তো ৱাক্যমব্রৱীৎ।
সমাশ্ৱসিহি ভদ্রং তে ন ভীঃ কার্যা ৎৱযা কপে ॥ **5.50.7** ॥

যদি তাৱৎ ৎৱমিন্দ্রেণ প্রেষিতো রাৱণালযম্।
তত্ত্ৱমাখ্যাহি মা তে ভূদ্ ভযং ৱানর মোক্ষ্যসে ॥ **5.50.8** ॥

যদি ৱৈশ্রৱণস্য ৎৱং যমস্য ৱরুণস্য চ।
চারুরূপমিদং কৃৎৱা প্রৱিষ্টো নঃ পুরীমিমাম্॥ **5.50.9** ॥

ৱিষ্ণুনা প্রেষিতো ৱাপি দূতো ৱিজযকাঙ্ক্ষিণা।
নহি তে ৱানরং তেজো রূপমাত্রং তু ৱানরম্॥ **5.50.10** ॥

তত্ত্বতঃ কথযস্ৱাদ্য ততো ৱানর মোক্ষ্যসে।
অনৃতং ৱদতশ্চাপি দুর্লভং তৱ জীৱিতম্॥ **5.50.11** ॥

অথৱা যন্নিমিত্তস্তে প্রৱেশো রাৱণালযে।
এৱমুক্তো হরিৱরস্তদা রক্ষোগণেশ্ৱরম্॥ **5.50.12** ॥

অব্রৱীন্নাস্মি শক্রস্য যমস্য ৱরুণস্য চ।
ধনদেন ন মে সখ্যং ৱিষ্ণুনা নাস্মি চোদিতঃ॥ **5.50.13** ॥

জাতিরেৱ মম ৎৱেষা ৱানরোঽহমিহাগতঃ।
দর্শনে রাক্ষসেন্দ্রস্য তদিদং দুর্লভং মযা॥ **5.50.14** ॥

ৱনং রাক্ষসরাজস্য দর্শনার্থং ৱিনাশিতম্।
ততস্তে রাক্ষসাঃ প্রাপ্তা বলিনো যুদ্ধকাঙ্ক্ষিণঃ॥ **5.50.15** ॥

রক্ষণার্থং তু দেহস্য প্রতিযুদ্ধা মযা রণে।
অস্ত্রপাশৈর্ন শক্যোঽহং বদ্ধুং দেৱাসুরৈরপি॥ **5.50.16** ॥

পিতামহাদেষ ৱরো মমাপি হি সমাগতঃ।
রাজানং দ্রষ্টুকামেন মযাস্ত্রমনুৱর্তিতম্॥ **5.50.17** ॥

ৱিমুক্তোঽপ্যহমস্ত্রেণ রাক্ষসৈস্ত্ৱভিৱেদিতঃ।
কেনচিদ্ রামকার্যেণ আগতোঽস্মি তৱান্তিকম্॥ **5.50.18** ॥

দূতোঽহমিতি ৱিজ্ঞায রাঘৱস্যামিতৌজসঃ।
শ্রূযতামেৱ ৱচনং মম পথ্যমিদং প্রভো॥ **5.50.19** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাব্যে সুন্দরকাণ্ডে পঞ্চাশঃ সর্গঃ ॥